ISSN 2278 - 0688
Volume - XXII

# ऋतायनी

A REFEREED RESEARCH JOURNAL OF SANSKRIT

Purulia , West Bengal
December 2022

Vol. - XXII
*ISSN 2278 - 0688*
Volume -XXII
December 2022

# ऋतायनी

# RITAAYANI

**A REFEREED RESEARCH JOURNAL OF SANSKRIT**
**(U.G.C. Approved Journal No. 40947)**

***Chief Editor***
Dr. Chandrakanta Panda

***Editor***
Dr. Jagamohan Acharya

***Associate Editors***
Dr. Buddheswar Sarangi
Dr.Jogeswar Mahanta
Sushant Pradhan

Purulia , West Bengal

| | | |
|---|---|---|
| 12. भट्टिकाव्ये योगतत्त्वसमीक्षणम् | देवसुजन मुखार्जी | 88 |
| 13. आयुर्वेदशास्त्रेक्रोधविमर्शः | श्रीमान् भोलेश्वरप्रधानः | 93 |
| 14. भक्तिप्रस्थानस्य परिचयः महत्त्वम् अवदानं च | Somen Dutta | 98 |
| 15. श्रीकृष्णलीलामृतकाव्ये अलङ्काराः | तोतन घोषः | 105 |
| 16. उत्तररामचरिते करूणरसविमर्शः | डॉ. सीताराम दास शास्त्री | 111 |
| 17. Importance of Sanskrit in Foreign Countries | Dr Chandra Kanta Panda | 116 |
| 18. विविधशास्त्रेषु साहित्यशास्त्रस्य महत्त्वम् | Subhadra Devi | 123 |
| 19. रवीन्द्रनाथस्य मेघदूतकाव्यालोचनम् | डॉ. जगमोहन आचार्यः | 129 |

# रवीन्द्रनाथस्य मेघदूतकाव्यालोचनम्

डॉ. जगमोहन आचार्यः

उपक्रमः

कालिदासस्य साहित्यसरित् सदैव नित्यनूतनतायाः वारिधारां नीत्वा प्रवहमाना भवति। संस्कृतसाहित्ये तस्य प्रभावः नास्ति संदेहः किन्तु इतरप्रान्तीयभाषायां तस्य प्राधान्यम् इतोऽपि वर्तते। विश्वगुरु रवीन्द्रनाथस्य साहित्ये कालिदासस्य प्रभावः सुगभीरः। कालिदासस्य ध्वनिः संयोजना रवीन्द्रस्य मनसि तरङ्गिता । कालिदासस्य साहित्ये रवीन्द्रः अभिभूतः सम्मोहितः। बाल्यतः रवीन्द्रः कालिदासाहित्यानुरागी आसीत्।

रवीन्द्रनाथः न केवलं वङ्गभाषायां कविः अपितु कालिदासादनन्तरं आधुनिकभारतस्य कविः। कालिदासेन सह रवीन्द्रनाथस्य सजातीयत्व लक्ष्यते। सेकाल कवितायां रवीन्द्रनाथेनोक्तम्,-

आमि यदि जन्म नितेन कालिदासेर काले
दैवे हतेम दशमरत्न नवरत्नेर माले,
एकटि श्लोके स्तुतिगेये वाजार काछे निताम चेये
उज्जयिनीर विजन प्रान्ते कानन घेरा वाडि।

रवीन्द्रनाथः कालिदासं मानसलोकस्य कविः वदति। मानसोऽयम् कैलासशृङ्गस्य मानसलोकः तथा मानवानां मानसलोकं एव। रवीन्द्रस्य भाषायाम्-

मानसकैलाशशृङ्गे निर्जनभुवने
छिलेतुमि महेशेर मन्दिर प्राङ्गणे
ताँहार आपन कवि, कवि कालिदास। (मानसलोक, चैतालि)

महाकवेः मेघदूतस्य प्रभावेण विशेषानुप्राणितः रवीन्द्रनाथः। तस्य मानसी काव्ये तथा नैताली काव्ये मेघदूतनाम्ना कविताद्वयं प्राप्यते। पुनः मेघदूतनाम्ना प्रबन्धः अपि तेन प्राचीनसाहित्य इति ग्रन्थे रचितः। कविताप्रबन्धयोः विषगतसमानता कालिदासस्य मेघदूतेन सह अस्ति। कालिदासस्य मेघदूतम् अनन्यसाधारणम्। मेघदूतकाव्यस्य चित्रावली तथा शब्दैश्वर्यं माधुर्य न रवीन्द्रनाथस्य चित्तमाकर्षयति। वर्षासु जाह्नवी यथा सर्वतः जलधारा माहत्य समुद्रे मिलति तथैव कालिदासस्य मेघदूतम् सकलविरहिजनानां कष्टं विरहिणी समीपं प्रापयति।

मेघदूतसंपर्के रवीन्द्रनाथस्यानन्यचिन्तनम्। बाल्यकालादेव रवीन्द्रः अग्रजस्य मुखात् मेघदूतस्य श्लोकं श्रुतवान्। ततः एव मेघदूतस्योपरि आकृष्टः। आषाढस्य प्रथमदिवसे...श्लोकं श्रुत्वा प्राचीनकालस्य घनवर्षणस्य चित्रं रवीन्द्रस्य मनसि उद्भासितम्। रवीन्द्रः कालिदासस्य